दिनाङ्क :- 18.04.2025

प्रात: - 06:55

## सर्वोच्च न्यायालय वक्फ बोर्ड

सर्वोच्च न्यायालयेन निगदिनं एत् अग्रिमवादश्रवणं यावत् वक्फ-संशोधन-अधिनियमान्तर्गतं वक्फ बोर्ड इत्यत्र अपि, च केन्द्रीय-वक्फ-परिषदि नवनियुक्तय: न स्यु:। मुख्यन्यायाधीशं समेत्य त्रिन्यायाधीशपीठेन एतदपि स्पष्टीकृतं यत् वर्तमान-वक्फ-संपत्तय:, सूचीबद्धा: सम्पत्तय: साम्प्रतं अपरिवर्तिता: स्यु:। शीर्षन्यायालयेन केन्द्रशासनाय त्रिदिनं यावत् प्रत्युत्तर- समीक्षाप्रदानाय निर्णय: श्रवित:। सम्प्रति प्रकरणे एतस्मिन् मे मासस्य पञ्चमे दिनांके वादश्रवणं भविष्यति।

## उपराष्ट्रपति:

उपराष्ट्रपति: जगदीप धनखड़: सर्वोच्च-न्यायालयेन प्रदत्तं निर्णयमभिलक्ष्य चिन्तां प्रकटितवान्। श्री धनखड़: प्रोक्तवान् यत् भारतसदृशे लोकतन्त्रिके देशे विधिनिर्माण-समीक्षा-विषयक: सर्वोच्च-न्यायालयस्य निर्णय: चिन्तनीय:।

## <u>मुम्बई-आतंकि-आक्रमण</u>

मुम्बई आतंकि-आक्रमणेषु तहव्वुर-हुसैन-राणा-इत्यस्य भारते प्रत्यर्पणानन्तरं भारतेन पाकिस्तानं समाहूतं यत् मुम्बई-आतंकि आकमणेषु अभियुक्तान् प्रति पाकिस्तानेन दण्डात्मकं कार्यान्वयनं समाचरणीयम्। गतदिने नवदेहल्यां वार्ताहर-सभां सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवाल: प्रोक्तावान् यत् मुम्बई-आतंकि-अभियुक्ता: निश्चयेन दण्डनीया:, पाकिस्तान: तेषां रक्षणं न करणीयम् अपितु दण्डात्मकं कार्यन्वयनं समनुष्ठीयेत्।

**दीक्षान्त-समारोह:**

**जगद्गुरु रामानन्दाचार्य-राजस्थान-संस्कृत-विश्वविद्यालय सप्तम: दीक्षान्त-समारोह: गतदिने समनुष्ठित:। समारोहस्य एतस्य मुख्यतिथि: लोकसभाध्यक्ष: ओम बिरला: कार्यक्रमं सम्बोधयन् प्रोक्तवान यत् संस्कृतभाषा सर्वासां भाषाणां जननी, एतस्या: वैज्ञानिकपक्ष: वर्तमाने जनमानसपुरस्सरं उपस्थापनीय: । लोकसभाध्यक्ष: समुदीरितवान् यत् संस्कृत भाषाया: वैज्ञानिकदृष्टिकोणमभिलक्ष्य अनुसन्धनानि नवचाराश्च वर्धनीया:। राज्यपालमहोदया: हरिभाऊ बागडे वर्या: अपि समारोहं सम्बोधितवन्त: समारोहे एतस्मिन् जूना-अखाडा-प्रमुख: स्वामी अवधेशानन्द -गिरिमहाराज: विद्यावाचस्पति-मानद-उपाधिना-सभाजित:। विश्वविद्यालयस्य कुलपति: प्रो. राम सेवक दुबे: एर्तास्मन्नवसरे पुस्तकानां विमोचनं कृतवान्। समारोहस्य संचालनं शास्त्रीकोशलेन्द्रदास: कृतवान्। तथैव धन्यवादज्ञापनञ्च कुलसचिव: नरेन्द्र कुमार वर्मा प्रर्काटतवान्।**

**<u>पंजाब-आतंकि आक्रमणं</u>**

**पंजाबप्रदेशे आतंकि-आकमण-रचनस्य प्रमुख: षड़यन्त्रकर्ता हरप्रीत सिंह: इत्यसौ अमेरिकादेशे आव्रजन-सीमा शुल्क- प्रवर्तन-विभागेन निगडित:। हरप्रीत सिंह: भारतस्य प्रमुख-आतंकि-विरोध-संस्था, राष्ट्रिय-अन्वेषणाभिकरणेन मुख्यतया वाञ्छित: आसीत्।**

**।। <u>इति वार्ता:</u>।।**